श्री हनुमत् पञ्चरत्नम्

Ragam - Anandabhairavi

वीताखिल-विषयेच्छं जातानन्दाश्रु पुलकमत्यच्छम्। सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यम्॥ १॥

तरुणारुणमुख-कमलं करुणा-रसपूर-पूरितापाङ्गम्। सञ्जीवनमाशासे मञ्जुल-महिमानमञ्जना-भाग्यम्॥ २॥

शम्बरवैरि-शरातिगमम्बुजदल-विपुल-लोचनोदारम्। कम्बुगलमनिलदिष्टम् बिम्ब-ज्वलितोष्ठमेकमवलम्बे॥ ३॥

दूरीकृत-सीतार्तिः प्रकटीकृत-रामवैभव-स्फूर्तिः। दारित-दशमुख-कीर्तिः पुरतो मम भातु हनुमतो मूर्तिः॥ ४॥

वानर-निकराध्यक्षं दानवकुल-कुमुद-रविकर-सदृक्षम्। दीन-जनावन-दीक्षं पवनतपः पाकपुञ्जमद्राक्षम्॥ ५॥

एतत्-पवन-सुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम्। चिरमिह-निखिलान् भोगान् भुक्त्वा श्रीराम-भक्ति-भाग्भवति॥ ६

vītākhila-viṣayecchaṁ jātānandāśrupulakamatyaccham ।
sītāpati dūtādyaṁ vātātmajamadya bhāvaye hṛdyam ।। 1।।

taruṇāruṇa mukha-kamalaṁ karuṇā-rasapūra-pūritāpāṅgam ।
sañjīvanamāśāse mañjula-mahimānamañjanā-bhāgyam ।। 2।।

śambaravairi-śarātigamambujadala-vipula-locanodāram ।
kambugalamaniladiṣṭam bimba-jvalitoṣṭhamekamavalambe ।। 3।।

dūrīkṛta-sītārtiḥ prakaṭīkṛta-rāmavaibhava-sphūrtiḥ ।
dārita-daśamukha-kīrtiḥ purato mama bhātu hanumato mūrtiḥ ।। 4।।

vānara-nikarādhyakṣaṁ dānavakula-kumuda-ravikara-sadṛkṣam ।
dīna-janāvana-dīkṣaṁ pavana tapaḥ pākapuñjamadrākṣam ।। 5।।

etat-pavana-sutasya stotraṁ yaḥ paṭhati pañcaratnākhyam ।
ciramiha-nikhilān bhogān bhuktvā śrīrāma-bhakti-bhāg-bhavati ।। 6।।

வீதாகி²ல-விஷயேச்ச²ம்ஜாதானந்தா³ஷ்ரு புலகமத்யச்ச²ம்।
ஸீதாபதிதூ³தாத்³யம்வாதாத்மஜமத்³யபா⁴வயேஹ்ரு'த்³யம்॥ 1॥

தருணாருணமுக2-கமலம்கருணா-ரஸபூர-பூரிதாபாங்க3ம்।
ஸஞ்ஜீவநமாஶாஸேமஞ்ஜுள-மஹிமாநமஞ்ஜநா-பா4க்3யம்॥ 2॥

ஶம்ப3ரவைரி-ஶராதிக3மம்பு3ஜத3ல-விபுல-லோசநோதா3ரம்।
கம்பு3க3லமநிலதி3ஷ்டம்பி3ம்ப3-ஜ்வலிதோஷ்ட2மேகமவலம்பே3॥ 3॥

தூ3ரீக்ரு′த-ஸீதார்தி: ப்ரகடீக்ரு′த-ராமவைப4வ-ஸ்பூ2ர்தி: ।
தா3ரித-த3ஶமுக2-கீர்தி: புரதோமமபா4துஹநுமதோமூர்தி: ॥ 4॥

வானர-நிகராத்4யக்ஷம் தா3நவகுல-குமுத3-ரவிகர-ஸத்3ருக்ஷம் ।
தீ3ந-ஜநாவந-தீ3க்ஷம் பவநதப: பாகபுஞ்ஜமத்3ராக்ஷம்॥ 5॥

ஏதத்-பவந-ஸுதஸ்யஸ்தோத்ரம்
ய: பட2திபஞ்சரத்நாக்2யம்।
சிரமிஹ-நிகி2லாந்போ4கா3ந்பு4ங்க்த்வா
ஶ்ரீராம-ப4க்தி-பாக்3-ப4வதி॥ 6॥